# Sri Suktam

Sanskrit · Devanagari source script · Latin rendering available

॥ अथ श्री सूक्तम् ॥
श्रीगणेशाय नम: ॥ अथ श्रीमहालक्ष्म्यै नम: ॥
हिरण्यवर्णांमिति पंचदशर्चस्य सूक्तस्य आनंदकर्दमचिल्की तेंदिरासुता ऋषय:
॥
श्रीरग्निश्वेत्युभे देवते ॥ आद्यास्तिस्रोऽनुष्टुभ: ॥ चतुर्थी बृहती ॥ पंचमीषष्ठ्यौ
त्रिष्टुभौ ॥ ततोऽष्टावनुष्टुभ: ॥ अंत्या प्रस्तारपंक्ति: ॥ जपे विनोयोग: ॥

॥ श्रीसूक्तप्रारंभ: ॥

|| atha śrī sūktam ||
śrīgaṇeśāya nama: || atha śrīmahālakṣmyai nama: ||
hiraṇyavarṇāmiti paṃcadaśarcasya sūktasya ānaṃdakardamacilkī
teṃdirāsutā ṛṣaya: ||
śrīragniśvetyubhe devate || ādyāstisro'nuṣṭubha: || caturthī bṛhatī ||
paṃcamīṣaṣṭhyau triṣṭubhau || tato'ṣṭāvanuṣṭubha: || aṃtyā
prastārapaṃkti: || jape vinoyoga: ||

|| śrīsūktaprāraṃbha: ||

हरि: ॐ ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

hari: oṃ || hiraṇyavarṇāṃ hariṇīṃ suvarṇarajatasrajām ||
caṃdrāṃ hiraṇmayīṃ lakṣmīṃ jātavedo ma āvaha ||

तां म आवह जातवेदो लक्ष्मीं अनपगामिनीम् ॥
यस्यां हिरण्यं विंदेयं गां अश्वं पुरुषान् अहम् ॥

tāṃ ma āvaha jātavedo lakṣmīṃ anapagāminīm ||
yasyāṃ hiraṇyaṃ viṃdeyaṃ gāṃ aśvaṃ puruṣān aham ||

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ॥
श्रियं देवीं उपव्हये श्री: मा देवी जुषताम् ॥

aśvapūrvāṃ rathamadhyāṃ hastinādaprabodhinīm ||
śriyaṃ devīṃ upavhaye śrī: mā devī juṣatām ||

कां सोस्मितां हिरण्यप्राकारां आर्द्रा ज्वलंतीं तृप्तां तर्पयंतीम् ॥
पद्मे स्थितां पद्मवर्णां तां इहोपह्वये श्रियम् ॥

kāṃ sosmitāṃ hiraṇyaprākārāṃ ārdrā jvalaṃtīṃ tṛptāṃ tarpayaṃtīm ||
padme sthitāṃ padmavarṇāṃ tāṃ ihopahvaye śriyam ||

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टां उदाराम् ॥
तां पद्मिनीमीं शरणमहं प्रपद्येऽ लक्ष्मी: मे नश्यतां त्वां वृणे ॥१॥

caṃdrāṃ prabhāsāṃ yaśasā jvalaṃtīṃ śriyaṃ loke devajuṣṭāṃ udārām ||
tāṃ padminīmīṃ śaraṇamahaṃ prapadye' lakṣmī: me naśyatāṃ tvāṃ vṛṇe ||1||

आदित्यवर्णे तपसोऽधिजातो वनस्पतिः तववृक्षोथ बिल्वः ॥
तस्य फलानि तपसा नुदंतु मायांतरायाश्च बाह्या अलक्ष्मीः ॥

ādityavarṇe tapaso'dhijāto vanaspati: tavavṛkṣotha bilva: ||
tasya phalāni tapasā nudaṃtu māyāṃtarāyāśca bāhyā alakṣmī: ||

उपैतु मां देवसखः कीर्तिश्च मणिना सह ॥
प्रादुर्भूतः सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥

upaitu māṃ devasakha: kīrtiśca maṇinā saha ||
prādurbhūta: surāṣṭre'smin kīrtimṛddhiṃ dadātu me ||

क्षुत्पिपासामलां ज्येष्ठां अलक्ष्मीं नाशयाम्यहम् ॥
अभूतिं असमृद्धिं च सर्वां निर्णुद मे गृहात् ॥

kṣutpipāsāmalāṃ jyeṣṭhāṃ alakṣmīṃ nāśayāmyaham ||
abhūtiṃ asamṛddhiṃ ca sarvāṃ nirṇuda me gṛhāt ||

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥
ईश्वरीं सर्वभूतानां तां इहोपह्वये श्रियम् ॥

gaṃdhadvārāṃ durādharṣāṃ nityapuṣṭāṃ karīṣiṇīm ||
īśvarīṃ sarvabhūtānāṃ tāṃ ihopahvaye śriyam ||

मनसः काममाकूतिं वाचः सत्यमशीमहि ॥
पशूनां रुपमन्नस्य मयि श्रीः श्रयतां यशः ॥२॥

manasa: kāmamākūtiṃ vāca: satyamaśīmahi ||
paśūnāṃ rupamannasya mayi śrī: śrayatāṃ yaśa: ||2||

कर्दमेन प्रजा भूता मयि संभव कर्दम ॥
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

kardamena prajā bhūtā mayi saṃbhava kardama ||
śriyaṃ vāsaya me kule mātaraṃ padmamālinīm ||

आप: सृजन्तु स्निग्धानि चिल्कीत वस मे गृहे ॥
निच देवीं मातरं श्रियं वासय मे कुले ॥

āpa: sṛjantu snigdhāni cilkīta vasa me gṛhe ||
nica devīṃ mātaraṃ śriyaṃ vāsaya me kule ||

आर्द्रां य: करिणीं यष्टिं सुवर्णां हेममालिनिम् ॥
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

ārdrāṃ ya: kariṇīṃ yaṣṭiṃ suvarṇāṃ hemamālinim ||
sūryāṃ hiraṇmayīṃ lakṣmīṃ jātavedo ma āvaha ||

आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम् ॥
चंद्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह ॥

ārdrāṃ puṣkariṇīṃ puṣṭiṃ piṃgalāṃ padmamālinīm ||
caṃdrāṃ hiraṇyamayīṃ lakṣmīṃ jātavedo ma āvaha ||

तां म आवह जातवेदो लक्ष्मीं अनपगामिनीं ॥
यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान् विंदेयं पुरुषान् अहम् ॥३॥

tāṃ ma āvaha jātavedo lakṣmīṃ anapagāminīṃ ||
yasyāṃ hiraṇyaṃ prabhūtaṃ gāvodāsyo'śvān viṃdeyaṃ puruṣān aham
||3||

यः शुचिः प्रयतो भूत्वा जुहुयाद् आज्यं अन्वहम् ॥
सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत् ॥
पद्मानने पद्मउरू पद्माक्षी पद्मसंभवे ॥
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥
अश्वदायै गोदायै धनदायै महाधने ॥
धनं मे लभतां देवि सर्वकामांश्चदेहि मे ॥
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ॥
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥
पुत्रपौत्र धनं धान्यं हस्त्यश्वादिगवे रथम् ॥
प्रजानां भवसि माता आयुष्मंतं करोतु मे ॥
धनं अग्निः धनं वायुः धनं सूर्यो धनं वसुः ॥
धनं इन्द्रो बृहस्पतिर्वरुणो धनमश्विना ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ॥
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥
भवंति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥
सरसिजनिलये सरोजहस्ते धवलतरांशुकगंधमाल्यशोभे ॥
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ॥
लक्ष्मीं प्रियसखीदेवीं नम्यच्युतवल्लभाम् ॥
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ॥ तन्नो लक्ष्मीः प्रचोदयात् ॥
श्रीवर्चस्वमायुष्यमारोग्यमाविधात् शोभमानं महीयते ॥
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घं आयुः ॥
॥ इति श्रीसूक्तम् ॥

ya: śuci: prayato bhūtvā juhuyād ājyaṃ anvaham ||
sūktaṃ paṃcadaśarcaṃ ca śrīkāma: satataṃ japet ||
padmānane padmaurū padmākṣī padmasaṃbhave ||
tanme bhajasi padmākṣi yena saukhyaṃ labhāmyaham ||
aśvadāyai godāyai dhanadāyai mahādhane ||
dhanaṃ me labhatāṃ devi sarvakāmāṃścadehi me ||
padmānane padmavipadmapatre padmapriye padmadalāyatākṣi ||

viśvapriye viśvamanonukūle tvatpādapadmaṃ mayi saṃnidhatsva ||
putrapautra dhanaṃ dhānyaṃ hastyaśvādigave ratham ||
prajānāṃ bhavasi mātā āyuṣmaṃtaṃ karotu me ||
dhanaṃ agni: dhanaṃ vāyu: dhanaṃ sūryo dhanaṃ vasu: ||
dhanaṃ indro bṛhaspatirvaruṇo dhanamaśvinā ||
vainateya somaṃ piba somaṃ pibatu vṛtrahā ||
somaṃ dhanasya somino mahyaṃ dadātu somina: ||
na krodho na ca mātsaryaṃ na lobho nāśubhā mati: ||
bhavaṃti kṛtapuṇyānāṃ bhaktānāṃ śrīsūktaṃ japet ||
sarasijanilaye sarojahaste dhavalatarāṃśukagaṃdhamālyaśobhe ||
bhagavati harivallabhe manojñe tribhuvanabhūtikari prasīda mahyam ||
viṣṇupatnīṃ kṣamāṃ devīṃ mādhavīṃ mādhavapriyām ||
lakṣmīṃ priyasakhīdevīṃ namyacyutavallabhām ||
mahālakṣmī ca vidmahe viṣṇupatnī ca dhīmahi || tanno lakṣmī: pracodayāt ||
śrīvarcasvamāyuṣyamārogyamāvidhāt śobhamānaṃ mahīyate ||
dhānyaṃ dhanaṃ paśuṃ bahuputralābhaṃ śatasaṃvatsaraṃ dīrghaṃ āyu: ||
|| iti śrīsūktam ||

---

## Source & edition

Complete selected15-rik core, preceded by source ritual introduction and followed by its devotional appendix and colophon. Printed1/2/3 mark groups of five core verses, not only3 verses. This unaccented community edition retains its spellings; no claim of a critical Vedic recitation text or English translation.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. श्री सूक्तम्, revision 33113. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-33113-960c028acf.